'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 2nd Semester Examination, 2022

## CC4-SANSKRIT (204)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

1. अधोलिखितयोः विभागयोः कस्यचिदेकस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम् – 12×1 = 12

''क''–विभागः

चतुर्णां सूत्राणां व्याख्या कार्या –

'क्तक्तवतू निष्ठां', 'कृत्यल्युटो बहुलम्', 'समानकर्तृकयोः पूर्वकाले', अत इञ्, 'अपत्यं पौत्रप्रभृति गोत्रम्', 'कन्यायाः कनीन च'।

''ख''–विभागः

सूत्रचतुष्टयं व्याख्येयम्–

एति-स्तु-शास्-वृ-दृ-जुषः क्यप्, कृत्यल्युटो बहुलम्, ऋहलोर्ण्यत्, समर्थानां प्रथमाद्वा, तस्यापत्यम्, जीवति तु वंश्ये युवा।

2. संस्कृतभाषया देवनागरीलिप्या च ससूत्रं पदसाधनं कार्यम् (द्वयोः विभागयोः) – 6×2 = 12

क-विभागः – कारकः, कुम्भकारः

ख-विभागः – दाक्षिः, एधनीयम्

ग-विभागः – वासिष्ठम्, छिन्नः

3. संस्कृतभाषया देवनागरीलिप्या च परिणतरूपं लेख्यम् (द्वयोः विभागयोः) – 3×2 = 6

क-विभागः – भिद् + क्तवतु, अस्मद् + छ, आ-गम् + ल्यप्

ख-विभागः – चि + यत्, शिव + अण्, गर्ग + यञ्

ग-विभागः – गै + क्त्वाच्, स्मृ + णमुल्, कृ + शतृ

4. एकस्योत्तरं देयम् – 12×1 = 12

(क) क आसीद् विहारभद्रः ? को वा वसुरक्षितः ? वसुरक्षितस्य उपदेशस्य प्रेक्षणायां विहारभद्रस्य कु-परामर्श आलोच्यताम्।

(ख) शुकनासोपदेशोपदिष्टं लक्ष्मीचरित्रं सम्यगुपस्थाप्यताम्।

5. अधोलिखितेषु द्वयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः – 6×2 = 12

(क) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरूषं प्रकृतिः। इन्द्रिय-हरिण-हारिणी च सततमतिदूरन्तेयमुपभोग-मृगतृष्णिका।

(ख) "अथाहमभ्येत्य व्रतत्या कयापि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च पञ्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात् पाषाणपातितैः प्रेत्यानीतः प्राणवृत्तिमापाद्य, तरुतलनिषण्णस्तं जरन्तमब्रवम्–"तात त एष बालः, को वा भवान्, कथं चेयमापदापन्ना" इति।

(ग) मनसा देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहताश्च आन्तः प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमप्यनुग्रहं गपयन्ति दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति।

6. संस्कृतभाषया देवनागरीलिप्या च संक्षिप्तमुत्तरं देयम् (द्वयोः) – 3×2 = 6

(क) "स्वैरविहारो मन्त्रो वा सेव्यः"– कस्य कृते नीतिरियम् ? अस्य कर्मणः कः समयः ?

(ख) का खलु महत्यनर्थपरम्परा ?

(ग) शुकनासोपदेश-शीर्षको वर्तते कस्मिन् ग्रन्थे ? कः आसीत् शुकनासः ? कस्य वा कृतेऽयम् उपदेशविधिः ?

——×——